स्त्वात् अणुत्वं यत्र चारम्भकद्रव्यान्तरं नास्ति स तादृशपरिमाणवत्त्वात् परमाणुरित्युच्यते। एवञ्च अणुशब्दस्य शुक्लादिशब्दवत् अणुत्वपरिमाणविशिष्टद्रव्यवाचकत्वम्। अणुत्वञ्च सूक्ष्मत्वम् अतिसूक्ष्मत्वञ्च। तत्र सूक्ष्मपरत्वेन सर्षपचीनकादिद्रव्याणामारम्भकद्रव्याल्पत्वात् तत्र प्रवृत्तिः। तदभिप्रायेणैव "अनणुषु दशमांशोऽणुष्वेकादशांश" इति लीला०। श्रुतौ च "अणोरणीयानिति" निर्द्देशः। अतिसूक्ष्मपरत्वे च "नित्या स्यादणुलक्षणेति" भाषा० तस्य नित्यत्वञ्च आरम्भकावयवाभावात् "अनित्या च भवेदन्या सैवावयवयोगिनीति" भाषापरिच्छेदेऽवयवयोगेनैवानित्यत्वकथनात् परमाणोस्तदभावेनैव नित्यत्वं भङ्ग्योक्तमिति नैयायिकाः। वेदान्तिनस्तु सूक्ष्मभूतानामपि ब्रह्मण उत्पत्तिमुररीचक्रुः। यथा च एतन्मतयोः युक्तायुक्तत्वे तथा आरम्भवादशब्दे वक्ष्यते। सूक्ष्मार्थग्राहित्वेन अणुबुद्धिरित्यादौ, अणुर्जीव इत्यादौ च दुर्ज्ञेयत्वेन तत्रैव तस्य भाक्तत्वम्। एवञ्च अणुत्वपरिमाणरूपगुणमादाय तद्वत्येवास्य प्रवृत्तिः तेन तत्र त्रि० स्त्रियान्तु गुणवचनतया वा ङीप्। अण्वी। "अण्व्यो मात्राविनाशिन्यो दशार्द्धानाञ्च याः स्मृता इति मनुः।" "अस्थूलमनणु इत्यादि" श्रुतिः अत्र नञ्तत्पुरुषसमासनिष्पन्नस्य अनणुशब्दस्य "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति" पाणिन्युक्तेः परवल्लिङ्गत्वेन अणुशब्दस्यापि नपुंसकत्वमित्यवसीयते। अधिकं परमाणुशब्दे वक्ष्यते।

**अणुक** त्रि० अणुप्रकारः अणु-स्थूला० कन्। अणुप्रकारे स्वार्थे कन्। अणुशब्दार्थे चीनकादिधान्ये पु०।

**अणुत्व** न० अणोर्भावः। अणुपरिमाणे।

**अणुधर्म्म** पु० अणुः सूक्ष्मो दुर्विज्ञेयो धर्म्मः। "दुर्बोधे धर्म्मे" "नहि सुबोधोऽप्यणुरेष धर्म्म इति" पुरा०।

**अणुभा** स्त्री अण्वी सूक्ष्मा भा दीप्तिर्यस्याः ब०। विद्युति।

**अणुमात्र** त्रि० अणुः परिमाणमस्य अणु+मात्रच्। अल्पपरिमाणे "स अणुमात्रेण न संबध्यते" इति शारीरकभा०।

**अणुरेवती** स्त्री अणुः सूक्ष्मा रेवती तारेव। दन्तिवृक्षे।

**अणुवीक्षण** न० अणुः सूक्ष्मो वीक्ष्यतेऽनेन करणे ल्युट्। सूक्ष्मपदार्थदर्शनसाधने यन्त्रभेदे, भावे ल्युट्। सूक्ष्मपदार्थालोचने न०।

**अणुव्रीहि** पु० कर्म०। सूक्ष्मधान्ये श्यामादौ चीनकादौ च।

**अण्ड** न० अमन्ति संप्रयोगं यान्ति अनेन अम-ड टवर्गादित्वेऽपि डस्य नेत्त्वम्। पुंसोऽवयवभेदे मुष्के, पक्षिडिम्बे, "तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति" मनुः। "ब्रह्माण्डभाण्डोदरभ्राम्यदिति" वीर०। वीर्य्ये च। स्वार्थे कन्। तत्रैव। अस्मिन् कुक्कुट्यादीनां पुंवत्। कुक्कुटाण्डम्।

**अण्डकटाह** न० अण्डं ब्रह्माण्डं कटाहमिव प्राणिजातकृतकर्मपाकसाधनत्वात्। शुभाशुभकर्मपाकसाधने ब्रह्माण्डगोलके। "तद्ब्रह्माण्डकटाहसंपुटतटे" इति सि० शि० गो०।

**अण्डकोटरपुष्पी** स्त्री० अण्डमिव कोटरे मध्ये पुष्पं यस्याः जातित्वात् ङीप्। नीलवुह्नावृक्षे।

**अण्डकोष(श)** पु० अण्डस्य मुष्कस्य कोष(शः) इवावरकत्वात्। अण्डाकारे चर्म्मावृते पुंचिह्नभेदे।

**अण्डज** पु० अण्डात् डिम्बात् जायते जन-ड। अण्डजाते पक्षिणि, सर्पे, मत्स्ये, (कांकलास) इति ख्याते कृकलासे च। अण्डजातमात्रे त्रि०। मृगनाभिकस्तूर्य्यान्तु स्त्री "अण्डजास्तु पक्षिणः सर्पा नक्रा मत्स्याः कच्छपा" इत्यादयः सर्व्व एवाण्डजातत्वात् "अण्डजाः। तेषामुत्पत्तिप्रकारः पदार्थादर्शे दर्शितो यथा "अण्डतो वर्त्तुलीभूताच्छुक्रशोणितसंयुतात् कालेन भिन्नात् पूर्णात्मा निर्गच्छन् प्रक्रमिष्यतीति"। अण्डजातादयोऽप्यत्र।

**अण्डालु** पु० अण्डः अस्त्यस्य अण्ड+आलुच्। डिम्बविशिष्टे मत्स्ये।

**अण्डीर** पु० अण्डः पुमवयवभेदः अस्यास्तीति अण्ड-ईरन्। विशिष्टसामर्थ्यवति पुरुषे, समर्थे च।

**अत** बन्धने इदित् भ्वा० पर०सक०सेट्। अन्तति। आन्तीत् "समन्तति कपोत इव गतधिमिति" वेदः।

**अत** बन्धने भ्वादि० पर०सक० सेट्। अतति। आतीत्।

**अत** प्रापणे, सातत्ये, गतौ च भ्वादि० पर० सक०सेट्। अतति। आतीत्। क्त अततः। इन् (पदातिः) "अतिथिरभ्यतति गृहान् प्रति" इति वेदः।

**अत्** अव्य० अत-क्विप्। आश्चर्य्ये। जर्य्यादि०। अद्भुतम्।

**अतक** पु० अतति सततं गच्छति अत-कन्। पथिके।

**अतट** पु० तट्यते आहन्यतेऽम्भसा इति तटं जलाघातस्थानं तन्नास्ति यस्य ब०। (आड़रीरि) प्रसिद्धे आलम्बनस्थानशून्ये, "मनोरथानामतटप्रपाताः" इति। पर्व्वताद्युच्चस्थाने, भूमेरधोभागे च।

**अतथोचित** त्रि० न तथारूपमुचितं यस्य। यस्य यद्रूपमुचितं तद्विरोधिरूपापन्ने।

**अतद्गुण** पु० "तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुण इति"